ॐ अच्युतानंतगोविंदनामोचारणभेषजंनश्यंतिसकलारोगाः सत्यंसत्यंवदाम्यहं १॥४००००जप४... स्मादृति

पर्वतस्यापत्यं स्त्री पार्वती पार्वतीपा
रदेतौ इति पार्वतीपरमेश्वर
श्वरः पार्वतीपरमेश्वरौ तौ २

ॐ श्रीगणेशाय नमः सरस्वत्यै नमः ॐ नमः शिवाय ॐ गुरुचरणकमलेभ्यो नमः राम ०

वाक् च अर्थश्च तौ २

ॐ वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये जगतः पितरौ वंदे पार्वतीपरमेश्वरौ १ क्व सूर्यप्रभवो
वंशः क्व चाल्पविषया मतिः तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरं २ मंदः कवियशःप्रार्थी ग
मिष्याम्युपहास्यतां प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ३ अथवा कृतवाग्द्वारे वंशेस्मिन्पूर्व
सूरिभिः मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ४ सोहमाजन्मशुद्धानामाफलो
दयकर्मणां आसमुद्रक्षितीशानामानाकरथवर्त्मनां ५ यथाविधिहुताग्नीनां यथाकामार्चि
तार्थिनां यथापराधदंडानां यथाकालप्रबोधिनां ६ त्यागाय संभृतार्थानां सत्याय मितभाषि
णां यशसे विजिगीषूणां प्रजायै गृहमेधिनां ७ शैशवेभ्यस्तविद्यानां यौवने विषयैषिणां

जेतुमिच्छति संतानाय वस्तुकामाय भोगाय दा शिशोर्भावः शैशवं दानाय वस्तु संचितधनानां स्वल्पभाषिणाम्
तरुणीयत्र(?) शैशवात्म दुष्करायरः
कृत्यमरः

वार्द्धके मुनिवृत्तीनां योगेनांते तनुत्यजां ८ रघूणामन्वयं वक्ष्ये तनुवाग्विभवोपि सन् तद्गु
णैः कर्णमागत्य चापलाय प्रचोदितः ९ तं संतः श्रोतुमर्हंति सदसद्व्यक्तिहेतवः हेम्नः संल
क्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा १० वैवस्वतो मनुर्नाम माननीयो मनीषिणां आसी
न्महीक्षितामाद्यः प्रणवश्छंदसामिव ११ तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः दिलीप इ
ति राजेंदुरिंदुः क्षीरनिधाविव १२ व्यूढोरस्को वृषस्कंधः शालप्रांशुर्महाभुजः आत्मक
र्मक्षमं देहं क्षात्रो धर्म इवाश्रितः १३ सर्वातिरिक्तसारेण सर्वतेजोभिभाविना स्थितः
सर्वोन्नतेनोर्वीं क्रांत्वा मेरुरिवात्मना १४ आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः आग
मैः सदृशारंभः आरंभसदृशोदयः १५ भीमकांतैर्नृपगुणैः स बभूवोपजीविनां अधृ

२.घृ.

२ ध्रष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः १६ रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परं नव्य

तीयुः प्रजास्तस्य नियंतुर्नेमिवृत्तयः १७ प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् सह

स्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः १८ सेनापरिच्छदस्तस्य द्वयमेवार्थसाधनम् शास्त्रेष्व

कुंठिता बुद्धिर्मौर्वी धनुषि चातता १९ तस्य संवृतमंत्रस्य गूढाकारेंगितस्य च फला

नुमेयाः प्रारंभाः संस्काराः प्राक्तना इव २० जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः अ

गृध्नुराददे सोर्थमसक्तः सुखमन्वभूत २१ ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविप

र्ययः गुणाः गुणानुबंधित्वात्तस्य सप्रसवा इव २२ अनाकृष्टस्य विषयैर्विद्यानां

दिलीप२ मार्गात् दिलीपस्य वेदवेदांगानां शब्दादिभिः दिलीपस्य

२

पारदृश्वनः तस्यधर्मरतेरासीद्वृद्धत्वंजरसाविना २३ प्रजानांविनयाधानात् रक्ष
णाद्भरणादपि सपितापितरस्तासांकेवलंजन्महेतवः २४ स्थित्यैदंडयतोदंड्यान्परि
णेतुःप्रसूतये अप्यर्थकामौतस्यास्तांधर्मएवमनीषिणः २५ दुदोहगांसयज्ञाय
सस्यायमघवादिवं संपद्विनिमयेनोभौदधतुर्भुवनद्वयम् २६ नकिलानुययु
स्तस्यराजानोरक्षितुर्यशः व्यावृत्तायत्परस्वेभ्योश्रुतौतस्करतास्थिता २७ द्वेष्योपि
सम्मतःशिष्टस्तस्यार्तस्ययथौषधम् त्याज्योदुष्टःप्रियोप्यासीद्दष्टोंगुष्ठइवाहिना
२८ तंवेधाविदधेनूनंमहाभूतसमाधिना तथाहिसर्वेतस्यासन्परार्थैकफला
गुणाः २९ सवेलावप्रवलयांपरिखीकृतसागरां अनन्यशासनामुर्वींशशासै

र॰ पू॰
३

कपुरीमिव ३० तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा पत्नी सुदक्षिणेत्यासीद्
ध्वरस्येव दक्षिणा ३१ कलत्रवंतमात्मानमवरोधे महत्यपि तया मेने मनस्वि
न्या लक्ष्म्या च वसुधाधिपः ३२ तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः विलं
बितफलैः कालं निनाय समनोरथैः ३३ तं गंगां भगीरथेनेव पूर्वेषां पावनक्षमां ३ इच्छता
संततिं तेन नन्यत्तां मेने त्रिशुको श्राता ३४ संतानार्थाय विधये स्वभुजादवतारिता ॥

३

तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ३४ अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया

तौ दंपती वसिष्ठस्य गुरोर्जग्मतुराश्रमं ३५ स्निग्धगंभीरनिर्घोषमेकं स्यंदनमा

स्थितौ ॥ प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ३६ मा भूदाश्रमपीडेति परि

मेयपुरस्सरौ ॥ अनुभावविशेषात्तु सेनापरिवृताविव ॥३७॥ सेव्यमानौ सुखस्प

र्शैः शालनिर्यासगंधिभिः पुष्परेणूत्किरैर्वातैराधूतवनराज

भिः ॥३८॥ मनोभिरामाः शृण्वंतौ रथनेमिस्वनोन्मुखैः ॥ षड्जसंवादि

१०४ नीः केकाः द्विधा भिन्नाः शिखंडिभिः ४० परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु म

गद्वंद्वेषु पश्यंतौ स्यंदनाबद्धदृष्टिषु ४१ श्रेणीबंधाद्वितन्वद्भिरस्तंभां तोरणस्रजं

सारसैः कलनिर्ह्रादैः क्वचिदुन्नमितानने ४२ पवनस्यानुकूलत्वात्प्रार्थनासिद्धि

शंसिनः रजोभिः तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ४३ सरसीष्वरविंदा

नां वीचिविक्षोभशीतलं आमोदमुपजिघ्रंतौ स्वनिःश्वासानुकारिणं

४४ ॥ ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनां ॥ अमोघाः प्रतिगृह्णातौ राम

४

श्रीशी रीरं

नगरवृद्धान् प्रत्यागतान् नामानि पृच्छन्तौ क्रमशः

वघ्यानुपदंमार्गशीर्षः ४५ हैयंगवीनमादाय घोषवृद्धानुपस्थितान् नामधेयानिपृच्छतौ

वनेभवानां अध्वमहीरुहाणां

वन्यानांमार्गशाखिनां ४६ एकादशभिःकुलकं ॥ काप्यभिख्यातयोरासीद्व्रजतोः शुद्धवे

हिमविरहितयोः योगे सति चित्राचन्द्रमसोरिव

षयोः हिमनिर्मुक्तयोर्योगेचित्राचन्द्रमसोरिव ४७ तत्तद्भूमिपतिःपत्न्यैदर्शयन्प्रियदर्श

नः अपिलंघितमध्वानंबुबुधेनबुधोपमः ४८ सदुष्प्रापयशाःप्रापदाश्रमंश्रान्तवाहनः

सायंसंयमिनस्तस्यमहर्षेर्महिषीसखः ४९ वनान्तरादुपावृत्तैःसमित्कुशफलाहरैः

१० रघु० ५

ग्निप्रत्युद्यातैः पूर्यमाणं तपस्विभिः॥५०॥ आकीर्णमृषिपत्नीनामुटजद्वा

ररोधिभिः। अपत्यैरिव नीवारभागधेयोचितैर्मृगैः॥५१॥ सेकान्ते मुनिकन्या

भिस्तत्क्षणोज्झितवृक्षकं॥ विश्वासाय विहंगानामालवालाम्बुपायिनं॥५२॥

आतपात्ययसंक्षिप्तनीवारासु निषादिभिः॥ मृगैर्वर्तितरोमन्थमुटजा

ङ्गनभूमिषु॥५३॥ अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान् पुनानं पवनोद्धूतैर्धूमै

राहुतिगन्धिभिः॥५४॥ अथ यन्तारमादिश्य धुर्यान्विश्रामयेति सः। ताम

५

वारोहयत्पत्नीं तस्मादवततार च ५५ तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेंद्रियाः अर्हणा-

मर्हते चक्रुर्मुनयो नयचक्षुषे ५६ विधेः सायंतनस्यांते स ददर्श तपोनिधिं अन्वासि-

तमरुंधत्या स्वाहयेव हविर्भुजं ५७ तयोर्जगृहतुः पादान्राजा राज्ञी च मागधी तौ गु-

रुर्गुरुपत्नी च प्रीत्या प्रतिननंदतुः ५८ तमातिथ्यक्रियाशांतरथक्षोभपरिश्रमं ५

पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ५९ अथाथर्वनिधेस्तस्य विजितारिपुरः पु-

रः अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः ६० उपपन्नं ननु शिवं सप्तस्वंगेषु यस्य मे ॥

२०

देवीनां सानुबंधानांच प्रतिहन्त्री त्वमापदां ॥६१॥ तव मंत्रकृतो मंत्रैर्दूरात्तसं

६ यमितात्मभिः प्रत्याहृत्यपनेत्रं वमिदृश्यलक्षमिदं स्मृताः ॥६२॥ विरोधवर्जितैर्हेतु

स्त्वयो विधिवदर्चितेषु दृष्टिर्भवति तस्यां नाम वग्रैः सविश्लोषितां ॥६३॥ पूर्वसापयुजी

विन्यो निरातंकानि रीतयः यन्मदीपाः पूजा तासु ते दे तु स्तव दृस्तवु च सं ॥६४॥ त्वये

वं चिन्त्यमानस्य गृहस्थाणां व सेयोनिना सानुबंधाः कंपनस्य संपदो मे निरापदः ॥६५॥

किं तु वध्यातवैनं तस्यां मद्दृश्यस्य दृशा प्रजं न मां भवति स दीपा रत्नस्य सर्वपिमिदं दिनो ॥६६॥

६

मत्परं दुर्लभं मत्वा नन्वमीवाजितं मया पपः एवैः स्वनिश्वासैः कुर्वोस्मुपभुज्यते ६७ ननो

मन्नेपरं वपुषा पिंडविच्छेददर्शिनः नष्टकामम भुजाम्याडै स्वधासंग्रहनतत्पराः ६८ सोहं

मायाविमूढात्मा प्रजालोपनिमीलितः प्रकाशस्याप्रकाशस्य लोकालोकस्य वाचलः

६९ लोकांतरसुखं पुण्यं तपोदानसमुद्भवं संततिघ्नं वपुषा हि परं वै दत्तं च शमीलो ७०॥

तथा हि नैव वितेन मीकयं पयपूपन्नू दृश्यसे सिद्धोत्वयामिवसेदां हृष्टोमास्त्रमपादपं ७१ सा

स त्वपी हुं भगवन् एणं मत्स्यमेवेद्धिमे अहं तद् दृश्यमिवांतानेनववदुःस्वदं तिनः ७२ रतसमा

२०.१०
यथाविमुच्येहं संविधातुं तथार्हसि इक्ष्वाकूणां दुरापेर्थे त्वदधीना हि सिद्धयः ७३ इति वि
ज्ञापितो राज्ञा ध्यानस्तिमितलोचनः क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ७४ सोपश्य
त्प्रणिधानेन संततेस्तंभकारणं भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ७५ पुरा शक्र
मुपस्थाय तवोर्वीं प्रति यास्यतः आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ७६ इमां देवी
मृतुस्नातां स्मृत्वा सपदि सत्वरः प्रदक्षिणक्रियातीतस्तस्याः कोपमजीजनः ७७ अव
जानासि मां यस्मादतस्ते न भविष्यति मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ७८
७

सशापोनत्वयाराजन्नचसारथिनाश्रुतः नदत्याकाशगंगायाःस्रोतस्युद्दामदिग्गजे

७८ ईप्सितंतदवज्ञानांविद्धिसार्गलमात्मनः प्रतिबध्नातिहिश्रेयःपूज्यपूजाव्यतिक्रमः ७९

हविषेदीर्घसत्रस्यसाचेदानींप्रचेतसः भुजंगपिहितद्वारंपातालमधितिष्ठति ८०

सत्वमेकांतरांतस्यामदीयांवत्समातरं आराधयसपत्नीकःसावांकामंविधास्यति ८१

इतिवादिनएवास्यहोतुराहुतिसाधनं अनिंद्यानंदिनीनामधेनुराववृतेवनात् ८२

ताम्रालललाटजांरेखांबिभ्रतीचासितेतरां संध्याप्रतिपदेनेवप्रतिभिन्नांशिमांशुना ८३

१०पृ०

ललाटोदयमाभुग्नंपल्लवस्निग्धपाटला विभ्रतीश्वेतरोमांकंसंध्येवशशिनंनवं ८५

भुवंकोष्णेनकुंडोध्नीमेध्येनावभृथादपि प्रस्रवेणाभिवर्षंतीवत्सालोकप्रवर्त्तिना ८६

रजःकणैःखुरोद्धूतैःस्पृशद्भिर्गात्रमंतिकात् तीर्थाभिषेकजांशुद्धिमादधानामहीपतेः ८७

तांपुण्यदर्शनांदृष्ट्वानिमित्तज्ञस्तपोनिधिः याज्यमाशंसितावंध्यप्रार्थनंपुनरब्रवीत् ८८

अदूरवर्तिनींसिद्धिंराजन्विगणयात्मनः उपस्थितेयंकल्याणीनाम्निकीर्तितएवयत् ८९

वन्यवृत्तिरिमांशश्वदात्मानुगमनेनगां विद्यामभ्यसनेनेवप्रसादयितुमर्हसि ९० ॥=॥

प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थानमाचरेः निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः
॥९१ वधूर्भक्तिमती चैनामर्चितामा तपोवनात् प्रयातां प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि॥
९२ इत्याप्रसादादस्यास्त्वं परिचर्यापरो भव अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रि
णां॥९३ तथेति प्रतिजग्राह प्रीतिमान्सपरिग्रहः आदेशं देशकालज्ञः शिष्यः शासि
तुरानतः॥९४ अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिं सूनुः सूनृतवाक्स्रष्टुर्विस
सर्जोर्जितश्रियं॥९५ सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः कल्पवित्कल्पयामा

मासवन्यामवास्य संविधाः ॥९६॥ निर्दिष्टां कुलपतिना स पर्णशालामध्यास्य प्रयत

परिग्रहद्वितीयः । तच्छिष्याध्ययननिवेदितावसानां संविष्टः कुशशयने नि

शां निनाय ॥९७॥ इति श्रीरघुवंशे महाकाव्ये कविराजकालिदासकृतौ वसिष्ठाश्र

मगमनो नाम प्रथमः सर्गः ॥१॥ ॐ श्रीगणेशाय नमः ॥ अथ प्रजानामधिपः प्रभाते जायाप्रतिग्रा

रितगंधमाल्यां । वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥१॥ तस्याः खुरन्यास

पवित्रपांसुमपांसुलानां धुरि कीर्तनीया । मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिर

न्वगछत ॥२॥ निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः । पयोधरीभूतचतुः

समुद्रां जुगोप गोरूपधरामिवोर्वीं ३ व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोप्यनुयायि-
वर्गः नचान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ४ आस्वादवद्भिः कवलै-
स्तृणानां कण्डूयनैर्दंशनिवारणैश्च अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभू-
त् ५ स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः जलाभिलाषी जलमाददा-
नां छायेव तां भूपतिरन्वगच्छत् ६ स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानुमितां दधा-
नः आसीदनाविष्कृतदानराजिरन्तर्मदावस्थ इव द्विपेन्द्रः ७ लताप्रतानोद्ग्रथितैः स केशैरधि-
ज्यधन्वा विचचार दावं रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्निव दुष्टसत्वान् ८ विस्र-

१०२ ष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य उदीरयामासुरिवोन्मदानामालोकशब्दं व
यसां विरावैः ९ मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानं अवाकिरन्बाललताः
प्रसूनैराचारलाजैरिव पौरकन्याः १० धनुर्भृतोप्यस्य दयार्द्रभावमाख्यातमंतःकरणैर्विशंकैः
विलोकयंत्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ११ स कीचकैर्मारुतपूर्णरंध्रैः कूज
द्भिरापादितवंशकृत्यं शुश्राव कुंजेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः १२ पृक्तस्तुषा
रैर्गिरिनिर्झराणामनोकहाकंपितपुष्पगंधी तमातपक्लांतमनातपत्रमाचारपूतं पवनः सिषे
वे १३ शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ऊनं न सत्त्वेष्वधिको बबाधे १०

पतंगः पक्षिसूर्ययोः रिति विश्वः

अंतरमवकाशावधीतमरः

तस्मिन्वनं गोप्तरि गाहमाने १४ संचारपूतानि दिगंतराणि कृत्वा दिनांते निलयाय गंतुं प्रचक्रमे पल्ल

वरागताम्रा प्रभा पतंगस्य मुनेश्च धेनुः १५ तां देवतापित्रतिथिक्रियार्थामन्वग्ययौ मध्यमलो

कपालः बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना १६ स पल्वलोत्तीर्णवराह

यूथान्यावासवृक्षोन्मुखबर्हिणानि ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि

पश्यन् १७ आपीनभारोद्वहनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषो नरेंद्रः उभावलंचक्रतुरंचिताभ्यां

तपोवनावृत्तिपथं गताभ्यां १८ वसिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनांतात् प

पौ निमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिव लोचनाभ्यां १९ पुरस्कृता वर्त्मनि पार्थिवेन प्रत्यु॥

र°
११

कृता पार्थिवधर्मपत्न्या तदंतरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या ॥२०॥ प्रदक्षिणीकृत्य
पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता प्रणम्य चानर्च विशालमस्याः शृंगांतरं द्वारमिवार्थसिद्धेः
॥२१॥ वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननंदतुस्तां भक्त्योपपन्नेषु हि तद्विधा
नां प्रसादचिह्नानि पुरःफलानि ॥२२॥ गुरोः सदारस्स निपीड्य पादौ समाप्य सांध्यं च विधिं दिली
पः दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णां ॥२३॥ तामंतिकन्यस्तबलिप्रदी
पामन्वास्य गोप्ता गृहिणीसहायः क्रमेण सुप्तामनुसंविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत्

११

एत २४ । इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः सप्त व्यतीयुस्त्रिगुणानि तस्य दिना
नि दीनोद्धरणोचितस्य ॥ २५ ॥ अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः गंगाप्र
पातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ॥ २६ ॥ सा दुःप्रधर्षा मनसापि हिंस्रैरित्यं
द्रिशोभाप्रहितेक्षणेन । अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ॥ २७ ॥ तदीय
माक्रन्दितमार्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घं । रश्मिष्विवादाय नगेन्द्रसक्तां निवर्तया
मास नृपस्य दृष्टिं ॥ २८ ॥ स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श । अधित्यका
यामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लं ॥ २९ ॥ ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्य

स्य शरं शरण्यः जाताभिषंगो नृपतिर्निषंगादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः ३० वामेतरस्तस्य क

रः प्रहर्तुर्नखप्रभाभूषितकंकपत्रे सक्तांगुलिः सायकपुंख एव चित्रार्पितारंभ इवावतस्थे ३१

बाहुप्रतिष्टंभविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः राजा स्वतेजोभिरदह्यतांतर्भो

गीव मंत्रौषधिरुद्धवीर्यः ३२ तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुं विस्मा

पयन्विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः ३३ अलं महीपाल तव श्रमेण प्रयुक्त

मप्यस्त्रमितो वृथा स्यात् न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्छति मारुतस्य ३४

कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठं अवेहि मां किंकरमष्टमूर्तेः कुंभोद
रं नाम निकुंभमित्रं ३५ अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोसौ वृषभध्वजेन यो हेम
कुंभस्तननिःसृतानां स्कंदस्य मातुः पयसां रसज्ञः ३६ कंडूयमानेन कटं कदा
चिद्वन्यद्विपेनोन्मथिता त्वगस्य अथैनमद्रेस्तनया शुशोच सेनान्यमालीढ
मिवासुरास्त्रैः ३७ तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ
व्यापारितः शूलभृता विधाय सिंहत्वमंकागतसत्ववृत्तिः ३८ तस्यालमे
षा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण उपस्थिता शोणितपारणा मे

२०
१३

मम राहोः चांद्रमसं वधिःसधास्वस्रुतेदि ननुगुरोः धनविनाशं पकपतत्स्वामीपेजदेयं
दृष्टान्तात् कथं स्वार्थे बुप्रतिविधानं दोषाय इतिभावः
दर्शितताश्रा कार्थितो शिष्यस्य कतिव्याम तेर्यन सः

मे सुरद्विषश्चान्द्रमसी सुधेव ॥३९॥ स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान्दर्शितशिष्य-

रसोनन घशः १
भक्तिः । शस्त्रेण रक्ष्यं यदशक्यरक्ष्यं न तद्यशः शस्त्रभृतां क्षिणोति ॥४०॥ इति प्रगल्भं पुरुषाधिराजो २
पुरुषाणामधिपराजानृपः

सराजा सिंहस्य वदत्
मृगाधिराजस्य वचो निशम्य प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ॥४१॥
ततजेर्थैः

मोक्तुमि
प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वभङ्गे वितथप्रयत्नः जडीकृतस्त्र्यम्बकवीक्षणेन व-
कुलकं जीरीश्रव कास्मिपस सः त्र्यंबकोहरः न स्पष्टतेनजडीकृत

यस्मात्कारणात् ईश्वरस्य किंकरत्वात्
ज्रं मुमुक्षन्निव वज्रपाणिः ॥४२॥ संरुद्धचेष्टस्य मृगेन्द्र कामं हास्यं वचस्तद्यदहं विवक्षुः
वज्रमिव कुरस्मितर्हि तुतहमीन प्रीपूर्णा

अन्तर्गतं प्राणभृतां हि वेद सर्वं भवानभावमतोऽभिधास्ये ॥४३॥ मान्यः स मे स्थावरजंगमानां
हसमेव हित लाधीव

सर्गस्थितिप्रत्यवहारहेतुः गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयम् ॥४४॥
आहिताग्नेः इति विशे बलात् दवि मोरुपधनस्यचपति
सर्गजात स्थावराणां तरुशैलादीनां जंगमानां मानुष्यादीनां सर्गस्थिति प्रत्यवहारस्य नाशस्य तेषु हेतुः सः ३

त्वं कामगतस्तत्ववृत्तिः जीवनं निर्वर्त्तयितुं संपादितुं त्वं प्रसीद निर्वाहकं ते दिनस्यावसानः तस्मिन् उत्सुको उत्कंठो बालवत्सोपस्याः सा

विसृज्यतां

सत्वंमदीयेनशरीरवृत्तिंदेहेननिर्वर्तयितुंप्रसीदद्दिनावसानोत्सुकबालवत्साविसृज्य

नंदनीम् मे विशिष्टस्य अपाकर्त्तुं ध्वांतं गिरेर्गुहानां दृष्टा गमस्ती खंडानि कुर्वन्

तांधेनरियंमहर्षेः॥४५ अथांधकारंगिरिगह्वराणांदंष्ट्रामयूखैःशकलानिकुर्वन्

पुनः सिंहः स्वरस्यानुचरः कारणकेलसहेतोः बहु त्यक्तुमिच्छन् विचारमोह एकछत्रं

भूयःसभूतेश्वरपार्श्ववर्तीकिंचिद्विहस्यार्थपतिंबभाषे॥४६ एकात

स्वामित्वं नूतनं वयःबल रूपं अल्पस्य फलस्य कृते त्यपि सर्वोत्कृष्टकार्याकार्यविमर्शविमूढः

पत्रंजगतःप्रभुत्वंनवंवयःकांतमिदंवपुश्च अल्पस्यहेतोर्बहुहातुमिच्छन्विचारमूढः

कृपादयालुकंपास्यादित्यमरः दृश्य भूतेषु अनुकंपा प्राणिषु वर्तते यदि अस्ति इयं नवति सति भवति जीवन् त्वं अपि नवना रक्षति

प्रतिभासिमेत्वं॥४७ भूतानुकंपातवचेदियंगौरेकाभवेत्स्वस्तिमतीत्वदंते जीवनपुनः

सर्वदा काल उपद्रवेभ्यः पिता इव अपराधैः चंडः अग्निकोपं नोत

शश्वदुपप्लवेभ्यःप्रजाःप्रजानाथपितेवपासि॥४८ अथैकधेनोरपराधचंडाद्गुरोःकृशा

अग्नेरेव अग्नेः प्रतिमान् गुरोः क्रोधं अपनेतुं दद्रता सता

नुप्रतिमाद्बिभेषि शक्योस्यमन्युर्भवताविनेतुंगाःकोटिशःस्पर्शयताघटोध्नीः॥४९

१५ रा

तद्रक्ष कल्याणपरंपराणां भोक्तारमूर्जस्वलमात्मदेहं महीतलस्पर्शनमात्रभिन्नं

ऋद्धं हि राज्यं पदमैंद्रमाहुः ५० एतावदुक्त्वा विरते मृगेंद्रे प्रतिस्वनेनास्य गुहागतेन

शिलोच्चयोपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ५१ निशम्य देवानुचरस्य वाचं

मनुष्यदेवः पुनरप्युवाच धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दया-

लुः ५२ क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः राज्येन किं तद्विपरी-

तवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ५३ कथं नु शक्योनुनयो महर्षेर्विश्राणनाच्चान्यप

अन्नासां तापयस्वनीनां तापसीनां ओं सदृशा त्वं विधि तृष्णार्तस्य तापमर्पयेन पदमरस ...येन गौर स्वदेहार्पणस्य निष्क्रयेण स्वविनिमयेन

पृत्वनीनां इमामनन्तो सरभेरवेदिरुदूजसापदं तेत्वयासा ५४ सेयं स्वदेहार्पणनिःक्र-

स्वकीयस्य धनापि स्वामिगृहे धनधनं रे दक्षिणेति भावः जीवनेवृत्ति भोजने ...व एवमस्ति मनेः क्रियाहोमादिः सेवा ... प्रयोजनं यस्य

येणन्याय्यामपापाचयितुं भवन्तं नपारणास्यादितितातवैवं भवेदलप्स्यमनैः क्रियार्थैः

तम प्रिइदं वे स्वामिपरतंत्रः यस्मादितो तवदेवदारोविषये महारेपतः स्वामिनः ... विनापूपगमयित्वा

५५ भवानपीदं परवानवैति महान्द्रियत्तमसवदेवदारो स्यात्तु नियोक्तुर्न हि शाक्यमगेविना

अश्रुरूपेन वेति किंदि तदि यशावशरीरेतस्मिन मम त्वत्कपाले

शपरसंस्वपमदत्तेतनपूर्वं किमर्थ्यादिस्यात्त्ववेचेमतेस्पराः शरीरेभवमेदयालुः एकोत्त

अवरूपविनाशिषु मद्युतानाविवे शरीरेषु अपेताः तिष्ठिति ... मुनीश्वराः कृपालापःपूर्वको रणपस्य संजातः

विधं विषमहिधानापि डेषमास्याखलभौतिकेषु ५६ संबंधमाभाषणपूर्वमाहुर्

आवयोः वनभूमौ तस्मात्कारणात् एतेनतस्य मनस्त्वस्त्वच्यति याचे नार्हसि

तः सनौ संगतयोवनांतेः तद्भूतनापानुगनार्हसि त्वं संबंधिनोमेप्रणयं विहंतुं ५८ ॥

इति वानुचर मित्रस्य

१५२० तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टंभविमुक्तबाहुः स न्यस्तशस्त्रो हरये स्वदेहमु

पानयत्पिंडमिवामिषस्य ५९ तस्मिन् क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपात

मुग्रं अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ६० उत्तिष्ठ वत्सेत्यमृता

यमानं वचो निशम्योत्थितमुत्थितः सन् ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रवि

णीं न सिंहं ६१ तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोसि ऋषिप्रभावा

न्मयि नांतकोपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ६२ भक्त्या गुरौ मय्यनुकंपया च प्रीतास्मि

हे वरंस्वीकुरु क्षीराणां कारणं नविद्धि किंतु कामानदोग्धीति त्वंजानीहि
तुभ्यं ते पुत्र वरं वृणीष्व न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नां ॥६३॥

संधुक्षयोजलिंबध्ये मानितानाम्पूजितानामर्थिनयेन स्वहस्तार्जितवीरशब्दो येन सः
ततोनंतरं याचकः
ततः समानीय समानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः ॥ वंशस्य कर्तारम

स्थिरवंशस्य संततामकामयमानस्तस्मै तनयं
नंतकीर्तिं सुदक्षिणायां तनयं ययाचे ॥६४॥ संतानकामाय तथेति कामं राज्ञे

प्रतिज्ञाय वत्स दुग्धवती क्षीरं पत्रनिर्मितपात्रे हे त्वंपिबेति दिलीपं
प्रतिश्रुत्य पयस्विनी सा ॥ दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुंक्ष्वेति तमादि

वत्सपीतशेषं अनुज्ञानस्पर्शे होमाविधिशिष्टमित्यर्थः वसिष्ठस्य प्राप्य हे
देश ॥६५॥ वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः ॥ ऊ

क्षीरं पातुं वलिरूप पृथिव्याः इत्थंअस्मत्प्रकारेण
धस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ॥६६॥ इत्थंवि

दिलीपेन नंदनी बोधितातृप्ता अतिसंतुष्टा तेन दिलीपेन सह नंदिनी समेता सा हिमालयस्य गुहायाः सकाशात् आगताः

१६८० नीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्र

अनायासेन प्रसन्नेंदुरिव मुखं यस्य सः धेन्वाः अनुग्रहं दिलीपः भूपालानां विज्ञाप्य हर्षचिह्नैः मुखरागादिभिः

मंश्रमेण ॥ ६७ तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य प्रहर्षचिह्नानु

पश्चात् सुदक्षिणायै अर्पितस्यैवेक कथनम् दिलीप नंदन्याः स्तन्यं क्षीरं अगर्हितः स्वभावः श्रेष्ठप्रेमवान्

मितं प्रियायै शशंस वाचा पुनरुक्तयेव ॥ ६८ स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो व

वत्सस्य हुतस्य चावशेषः तेनानुमतिः सन् शुभ्रं कीर्तिरिव स्थितां तृष्णावान् अतिशयतृष्णः सन्

त्सहुतावशेषं पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ॥ ६९

प्रातःकाले यथोक्तस्य व्रतस्य... प्रस्थाने भवं... तन्मिमन्तर्पणैः सुदक्षिणा दिलीपौ

प्रातर्यथोक्तव्रतपारणान्ते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य तौ दंपती स्वां प्रति राज

जितेंद्रियः वसिष्ठः प्रदक्षिणीकृत्वा हवनाधिकरणमग्निं विलीए

धानीं प्रस्थापयामास वशी वसिष्ठः ॥ ७० प्रदक्षिणीकृत्य हुतं हुताशमनन्तरं

अनंतरं

१६

सद्भिर्मंगलैः प्रदक्षिणादिभिर्मंगलाचारैरुदग्रतरप्रभावो यस्य सः
उत्कृष्टतेजा यस्य सः

नारुंधतीं च धेनुं सवत्सां च नृपः प्रतस्थे सन्मंगलोदग्रतरप्रभावः ७१ श्रोत्राभि-

श्रोत्रयोः सु... मनोहरध्वनिना ... हृदयम् ... मार्गं ... घातेन रहितोऽसाव

रामध्वनिना रथेन स धर्मपत्नीसहितः सहिष्णुः । ययावनुद्घातसुखेन मार्गं

स्वेन पूर्णेन सफलेन मनोरथेन ... अदर्शनेन ... प्रजार्थं चतत्...

स्वेनैव पूर्णेन मनोरथेन ७२ तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शि-

लोचनैः ... पुरंदरस्य श्रीरिव श्रीर्यस्य सः

ताङ्गं नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदितं नाथमिवौषधीनां ७३ पुरंदरश्रीः पु-

उद्गता पताका यस्मिन् ... पौरजनैः ... स्तूयमानः ... भुजंगेंद्रस्य समानं सारं बलं च ...

रमुत्पताकं प्रविश्य पौरैरभिनंद्यमानः भुजे भुजंगेंद्रसमानसारे भूयः स भू-

मेर्धुरमाससंज ७४ अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वह्निनि-

... नयनात्समुत्पन्नं चन्द्रमिव ... आकाशः ... गंगा ...

दिलीपस्यकुलवृद्ध्यै दधौ सुदक्षिणा अभिनवप्राप्तं

१० एतं तेमैशं नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोकपालान्

२ अष्टलोकपालानांतेजोविशेषैः

भावैः ७५ इति श्रीरघुवंशे महाकाव्ये कविराजकालिदासकृतौ नंदिनीवरलाभो

गर्भधारणानंतरं मनोरथं दिलीपस्य प्राप्तकाले सखीजनो दृष्टिरानंदनादृष्टीनां कौमुदीमुखं चंद्रिकाप्रादुर्भावं

नाम द्वितीयः सर्गः अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखं

मूलकारणं अथवंशस्य गर्भचिह्नं धारयामास शरीरस्यकार्श्यात्

निदानं तत्कारि कारणमूलमेवं

निदानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा दौहृदलक्षणं दधौ ॥१॥ शरीरसादादसमग्र

अल्पाभरणा उपलक्षितासुदक्षिणा लोध्रपुष्पवत्पांडुना अल्पकांतिना विचेयाः तारका प्रभाता ईषदूनप्रभातसमानेन प्रभाता

भूषणा मुखेन सालक्ष्यत लोध्रपाण्डुना तनुप्रकाशेन विचेयतारका प्रभातकल्पा

रात्रिइवचन्द्रलांछिता दिलीपः चुंबयित्वा प्राप्तो करिराजइव

शशिनेव शर्वरी ॥२॥ तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ करी १०

तस्यासुदक्षिणा एकांते
यामुखं

धुर्यं श्रीनागकेसरः

उदितं विंदुभिः मेघानां ग्रीष्मावसाने वनस्पतीरं स्वर्गमिव इंद्रः पालयिष्यति

वसिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलं ३ दिवं मरुत्वानिव भोक्ष्यते

पृथिवीं चक्रवर्ती यस्मात्कारणात् स पुत्रः कारणात् भोगवस्तुनि कवेः उत्कंठा दोहदलक्षणे विधे निरधौ

भुवं दिगंतविश्रांतरथो हि तत्सुतः अतोभिलाषे प्रथमं तथाविधे मनो ववंधान्यरसान्वि

विहाय लज्जया मह्यं कथयति स्पृहावती किमपि इष्टं अभिलाषवती

लंघ्य सा ४ न मे ह्रिया शंसति किंचिदीप्सितं स्पृहावती वस्तुषु केषु मागधी इति स्म पृ

पृच्छति अनुक्षणं आदरवान्सन् सखीजनं दिलीपः प्राप्य दोहदलक्षणगर्भस्त्रीमनोरथेन दुःखस्वभावतां

च्छत्यनुवेलमादृतः प्रियासखीमुत्तरकोशलेश्वरः ५ उपेत्य सा दोहददुःखशीलतां

पतत्सु वव्रे भर्त्रा आनीतं अभिलाषभोगेपवर्त्ति स्वर्गेपि प्राप्यं दिलीपस्य दुर्लभं न

यदेव वव्रे तदपश्यदाहृतं न हीष्टमस्य त्रिदिवेपि भूपतेरभूदनासाद्यमधिज्यध

दोहदे दिने गच्छत्सु नितांतेनातिशयेन पीवरं तिरस्कृतवान्

न्वनः ६ दिनेषु गच्छत्सु नितांतपीवरं तदीयमानीलमुखं स्तनद्वयं तिरश्चकार भ्र

१२० मरावलीढयोः सुजातयोः पंकजकोशयोः श्रियं ७ क्रमेण निस्तीर्य च दोहदव्यथां

प्रचीयमानावयवा रराज सा पुराणपत्रापगमादनंतरं लतेव संनद्धमनोज्ञपल्ल

वा ८ निधानगर्भामिव सागरांबरां शमीमिवाभ्यंतरलीनपावकां नदीमिवांतःस

लिलां सरस्वतीं नृपः ससत्वां महिषीममन्यत ९ प्रियानुरागस्य मनःसमुन्नतेर्भु

जार्जितानां च दिगंतसंपदां यथाक्रमं पुंसवनादिकाः क्रियाः धृतेश्च धीरः स

दृशीर्व्यधत्त सः १० सुरेंद्रमात्राश्रितगर्भगौरवात्प्रयत्नमुक्तासनया गृहागतः तयो

१८

पचारांजलिखिन्नहस्तयाननंदपारिश्रवनेत्रयानृपः ११ कुमारभृत्याकुशलै
रधिष्टितेभिषग्भिराप्तैरथगर्भवेश्मनि पतिःप्रतीतःप्रसवोन्मुखींप्रियां
ददर्शकालेदिवमभ्रितामिव १२ ग्रहैस्ततःपंचभिरुच्चसंश्रयैरसूर्यगैःसू
चितभाग्यसंपदम् असूतपुत्रंसमयेशचीसमात्रिसाधनाशक्तिरिवार्थमक्षय
म् १३ दिशःप्रसेदुर्मरुतोववुःसुखाःप्रदक्षिणार्चिर्हविरग्निराददे बभूवसर्वं
शुभशंसितत्क्षणंभवोहिलोकाभ्युदयायतादृशां १४ अरिष्टशय्यांपरितो

१६ विसारिणासुजन्मनस्तस्यनिजेनतेजसा निशीथदीपाःसहसाहतत्विषो
बभूवुरालेख्यसमर्पिताइव॥१५॥जनायशुद्धान्तचरायशंसतेकुमारजन्मामृत
सम्मिताक्षरं अदेयमासीत्त्रयमेवभूपतेःशशिप्रभंछत्रमुभेचचामरे॥१६॥निवात
पद्मस्तिमितेनचक्षुषानृपस्यकान्तंपिबतःसुताननंपयोनिधेःपूरइवेन्दुदर्शनात्
गुरुःप्रहर्षःप्रबभूवनात्मनि॥१७॥समीक्ष्यपुत्रस्यचिरात्पितामुखंनिधानकुंभस्य
युवेवदुर्गतः मुदाशरीरेप्रबभूवनात्मनःपयोधिरिंदूदयमूर्छितोयथा॥१८॥ १८

सजातकर्मण्यखिलेतपस्विनातपोवनादेत्यपुरोधसाकृते दिलीपसूनुर्मणिरा
करोद्भवःप्रयुक्तसंस्कारइवाधिकंबभौ १९ सुखश्रवामंगलतूर्यनिस्व
नाःप्रमोदनृत्यैःसहवारयोषितांनकेवलंसद्मनिमागधीपतेःपथिव्यजृ
म्भन्दिवौकसामपि २० नसंयतस्तस्यबभूवरक्षितुर्विसर्जयेद्यंसुतजन्महर्
षितः ऋणाभिधानात्स्वयमेवकेवलंतदापितॄणांमुमुचेसबंधनात् २१
श्रुतस्ययायादयमंतमर्भकस्तथापरेषांयुधिचेतिपार्थिवः अवेक्ष्यधातोर्ग

र० २० मनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम् २२ पितुः प्रयत्नात्स समग्रसंपदः

शुभैः शरीरावयवैर्दिने दिने पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बा

लचंद्रमाः २३ उमावृषाङ्कौ शरजन्मना यथा यथा जयंतेन शचीपुरंदरौ तथा

नृपः सा च सुतेन मागधी ननंदतुस्तत्सदृशेन तत्समौ २४ रथाङ्गनाम्नोरिव भा

वबंधनं बभूव यत्प्रेम परस्पराश्रयं विभक्तमप्येकसुतेन तत्तयोः परस्परस्यो

परि पर्यचीयत २५ उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवलंब्य

२०

चांगुलिं अभूच्चनम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोर्भकः २५ तमं
कमारोप्य शरीरयोगजैः सुखैर्निषिंचंतमिवामृतं त्वचि उपांतसंमीलित
लोचनो नृपः चिरात्सुतस्पर्शरसज्ञतां ययौ २६ अमंस्त चानेन परार्ध्यजन्मना
स्थितेरभेत्ता स्थितिमंतमन्वयं स्वमूर्तिभेदेन गुणाग्र्यवर्तिना पतिः प्रजाना
मिव सर्गमात्मनः २७ स वृत्तचूडश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिर
न्वितः लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत् २८

२१२०
अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियं अवंध्ययत्नाश्च बभू
वुरत्र ते क्रियाहि वस्तूपहिता प्रसीदति २९ महोक्षतां वत्सतरः स्पृशन्निव द्वि
पेन्द्रभावं कलभः श्रयन्निव रघुः क्रमाद्यौवनभिन्नशैशवः पुपोष गांभीर्यम
नोहरं वपुः ३० धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः
ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः ३१ त्वचं स मे
ध्यां परिधाय रौरवीमशिक्षतास्त्रं पितुरेव मंत्रवित् न केवलं तद्गुरुरेकपार्थिवः क्षि

त्तावभूदेव धनुर्धरोपिसन्ः ३३ अथास्य गोदानविधेरनन्तरं विवाहदीक्षांनिरवर्त्त

यद्गुरुः नरेन्द्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः ३४ युवा युग

व्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकन्धरः वपुःप्रकर्षादजयद्गुरुं रघुस्त

थापि नीचैर्विनयाददृश्यत ३५ अथ प्रजानां चिरमात्मना धृतां नितान्तगुर्वी

लघयिष्यता धुरं निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्द

भाक् ३६ नरेन्द्रमूलायतनादनन्तरं तदास्पदं श्रीर्युवराजसंज्ञितं अगच्छदंशे

२२ २०

नगुरोरभिमतार्थविघ्नेनवावत्तारंकमलादिवोत्पलं ॥३६॥ उषर्बुधः सारथिनेववायुनाघ
नव्यपायेनगभस्तिमानिव वभूवतेनातितरांसुदुःसहः कटप्रभेदेनकरीवपार्थि
वः ॥३८॥ नियुज्यतंमेधतुरंगरक्षणेधनुर्धरैः राजसुतैरनुद्रुतं अपूर्णमेकेनशत
क्रतुःसमःशतंक्रतूनामपविघ्नमापसः ॥३९॥ ततःपरंतेनमखाययज्वनातुरंगम
मुत्सृष्टमनर्गलंपुनः धनुर्भृतामग्रतएवरक्षिणांजहारशक्रःकिलगूढविग्र
हः ॥४०॥ विषादलुप्तप्रतिपत्तिविस्मितंकुमारसैन्यंसपदिस्थितंचतत वसिष्ठधे

नुष्मपदद्ध्यागताम्भुतप्रभावाददृष्ट्वोपनंदनी ४२ स्वेदांबुनामार्ज्जयपुत्रलोच
नेममैववपेनेदृतंतरंगमीवृसे घोन्वानिघ्राम्येतिवचःसमीरितंपरांमदंप्रापदिली
पनंदनः ४३ रतंतदंगानिस्पंदजलेनलोचनेनप्रमृज्यपुण्येनपुरस्कृतःसतां श्रुतीप्र
द्रियेषुप्रपन्नदर्शनोवभूवभावेषुदिलीपनंदनः ४४ सपूर्ववृत्तःपर्ववृत्तपदद्रष्टा
ततंददर्शदेवंनरदेवसंभवः पुनःपुनःस्नजनिषिद्धचापलंस्फुरंतमभ्यंबरध

[illegible] २० रश्मिसंयुतं ४४ शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः
अवोचदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्त्तयन्निव ४५ त्रिलो
कनाथेन सततं मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा स चेत्स्वयं कर्मसु ध
र्मचारिणां त्वमन्तरायो भवसि च्युतो विधिः ४६ मखांशभाजां प्रथमो मनीषिभि
स्त्वमेव देवेंद्र सदा निगद्यसे अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं
प्रवर्त्तसे ४७ तदंगमग्र्यं मघवन्महाक्रतोरमुं तुरंगं प्रतिमोक्तुमर्हसि पथः श्रुते

दृशिंप्यतार्ढस्थूमाम्लीमसामाद्दे तेनपद्वतिं ४५ इतिप्रगल्भं रघुणासमीरितं वचो
निशम्याधिपतिर्दिवौकसां निवर्तयामासरंहसः सविस्मयः प्रचक्रमेचप्रतिवक्तुमुत्त
रं ४६ यदात्थराजन्यकुमारतत्तथायशस्तुरक्ष्यंपरतोयशोधनैः जगत्प्रकाशंत
दशेषमिज्ययाभवद्गुरुर्लंघयितुंममोद्यतः ४७ हरिर्यथैकः पुरुषोत्तमः स्मृतोम
हेश्वरस्त्र्यंबकएवनापरः तथाविदुर्मांमुनयः शतक्रतुंद्वितीयगामीनहिशब्दएषनः
४८ अतोयमश्वः कपिलानुकारिणापितुस्त्वदीयस्यमयापहारितः अलंप्रयत्नेन

२५ २० तवात्रमानिधाः पदं पदव्यां सगरस्य संततेः ॥५२॥ ततः प्रहस्याह पुनः पुरंदरं व्यपेतभीर्भू-
मिपुरंदरात्मजः । गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवान् ॥५३॥
स एवमुक्त्वा मघवन्तमुन्मुखः करिष्यमाणः सशरं शरासनं । अतिष्टदालीढविशे-
षशोभिना वपुःप्रकर्षेण विडंबितेश्वरः ॥५४॥ रघोरवष्टंभमयेन पत्रिणा हृदि क्षतो गो-
त्रभिदप्यमर्षणः । नवांबुदानीकमहूर्त्तलांछने धनुष्यमोघं समधत्त मार्गणं ॥५५॥
नरेंद्रसूनोः स बृहद्भुजांतरं प्रविश्य भीमासुरशोणितोचितः । पपावनास्वादितपू-

र्वमाशुगः कुतूहलेनेव मनुष्यशोणितं ५६ हरेः कुमारोपि कुमारविक्रमः सुर
द्विपास्फालनकर्कशांगुलौ भुजे शचीपत्रलताक्रियोचिते स्वनामचिह्नं निच
खान सायकं ५७ जहार चान्येन मयूरपत्रिणा शरेण शक्रस्य महाशनिध्वजं॥
चुकोप तस्मै स भृशं सुरश्रियः प्रसह्य केशव्यपरोपणादिव ५८ तयोरुपान्तस्थि
तसिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः बभूव युद्धं तुमुलं जयैषिणोर
धोमुखैरूर्ध्वमुखैश्च सायकैः ५९ अतिप्रबन्धप्रहितास्त्रवृष्टिभिस्तमाश्रयं दुष्प्र

२५ र० सहस्रतेजसः शशाक निर्वापयितुं न वासवः स्वतश्च्युतं वह्निमिवाद्भिरंबुदः ६० ततः
प्रकोष्ठे हरिचंदनांकिते प्रमथ्यमानार्णवधीरनादिनीं रघुः शशांकार्द्धमुखेन प
त्रिणा शरासनज्यामलुनाद्बिडौजसः ६१ स चापमुत्सृज्य विवृद्धमत्सरः प्रणाशना
य प्रबलस्य विद्विषः महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामंडलमस्त्रमाददे ६२
रघुर्भृशं वक्षसि तेन ताडितः पपात भूमौ सह सैनिकाश्रुभिः निमेषमात्रादवधू
य तद्व्यथां सहोत्थितः सैनिकहर्षनिःस्वनैः ६३ तथापि शस्त्रव्यवहारनिष्ठुरे विप